## Program Outcomes

### शास्त्री - प्राचीनन्यायवैशेषिकम्

**फलितांशाः - (Outcomes)**

- प्राचीनन्यायवैशेषिकदर्शनयोः अध्ययनेन न्यायवैशेषिकदर्शनेषु प्रतिपादितानां पदार्थतत्त्वानां प्रमाणानां च स्वरूपं यथावत् ज्ञातुं समर्थो भवति।
- न्यायग्रन्थेषु प्रतिपादितानां वादप्रक्रियाणाम् अवगमेन लोके सन्दिग्धेषु अर्थेषु निश्चयसम्पादनक्षमतां प्राप्नोति।
- वैशेषिकग्रन्थेषु निहितस्य परमाणुकारणतावादस्य अध्ययनेन प्रपञ्चस्य तन्मूलकारणस्य च युक्तिपूर्वकः अधिगमः जायते।
- विभागीयस्नातकपदवी शिक्षाशास्त्री(B.Ed)इत्यादिविभागेषु अध्ययनार्थं सामान्यरूपेण योग्यतां प्रददाति तथा S.S.C., P.S.C. इत्यादि वृत्तिपरप्रतियोगितापरीक्षासु भागग्रहणे तथा तत्र उत्तीर्णतायाः लाभे च दक्षतां सम्पादयति।
- विषयेऽस्मिन् प्राप्तस्नातकः प्राचीनन्यायवैशेषिकविभागे स्नातकोत्तरकक्षां प्रवेष्टुम् अर्हति।

### आचार्यः - प्राचीनन्यायवैशेषिकम्

- न्यायमञ्जर्यादिग्रन्थाः भाषासौन्दर्यप्रदानपूर्वकं गभीरतत्त्वानाम् अवगमं जनयन्ति।
- बौद्धजैनादिदर्शनान्तरविचाराणामपि सयुक्तिकं ज्ञानं जायते।
- परमाणु-ईश्वर-अदृष्टादीनाम् अपूर्वपदार्थानां विवेचनं सञ्जायते।
- प्राचीनन्यायवैशेषिकविचाराणाम् अधिगमेन शास्त्रान्तरविचाराननायासेन ज्ञातुं प्रभवति।
- विभागेऽस्मिन् उत्तीर्णपरस्नातकः अल्पपरिश्रमेण NET, SLET इत्यादिस्पर्धात्मकपरीक्षायाम् उत्तीर्णतां प्राप्नोति।
- अत्र आचार्यपदवीं प्राप्य विद्यावारिधिं कर्तुम् अर्हतां प्राप्नोति, तथा महाविद्यालयेषु विश्वविद्यालयेषु सहायकाचार्यस्थानं प्राप्तुं समर्थो भवति।

### विद्यावारिधिः

- भाषादृष्ट्या विषयदृष्ट्या चातिगभीरेऽस्मिन् शास्त्रे समवाप्तविद्यावारिधिः समाजे सुप्रतिष्ठां प्राप्नोति।
- वैशेषिकदर्शनपदार्थानाम् आधुनिकविज्ञानदृष्ट्या विवेचनेन नूतनानां विचाराणाम् आविष्कारो जायते।
- न्यायदर्शने उपनिबद्धानां वादजल्पवितण्डानां तथा जातिनिग्रहस्थानानां विशेषाध्ययनेन सामाजिकन्यायव्यवस्थायां विवेचनकौशलं प्राप्नोति।
- महाविद्यालयेषु विश्वविद्यालयेषु च प्राध्यापकपदविप्राप्तौ योग्यता समुपलभ्यते।

- उत्तरानुसन्धानं (Post Doctoral Research) कर्तुं योग्यता प्राप्यते।
- भारतीयदार्शनिकानुसन्धानपरिषद् (I.C.P.R.) इत्यादिविविधसंस्थाभ्यः परियोजनाप्राप्त्यर्थं योग्यता समुपलभ्यते।